# Mahavidya Kavacham 2

# महाविद्याकवचम् २

## Document Information

Text title : mahAvidyAkavacham 2

File name : mahAvidyAkavacham2.itx

Category : devii, dashamahAvidyA, kavacha, devI

Location : doc_devii

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com, NA

Description/comments : From Durlabh Stotrani. muNDamAlA tantra dashama paTalah shloka 57-86

Latest update : August 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 7, 2020

*sanskritdocuments.org*

# महाविद्याकवचम् २

सदाशिव ऋषि देवि उष्णिक्छन्दः उदीरितम् ।
विनियोगश्च देवेशि सततं मन्त्रसिद्धये ॥ १॥

मस्तकं पार्वतीपातु पातु पञ्चाननप्रिया ।
केशं मुखं पातु चण्डी भारती रुधिरप्रिया ॥ २॥

कण्ठं पातु स्तनं पातु कपालं पातु चैव हि ।
काली करालवदना विचित्राचित्रघण्टिनी ॥ ३॥

वक्षःस्थलं नाभिमूलं दुर्गा त्रिपुरसुन्दरी ।
दक्षहस्तं पातु तारा सर्वाङ्गी सव्यमेव च ॥ ४॥

विश्वेश्वरी पृष्ठदेशं नेत्रं पातु महेश्वरी ।
हृत्पद्मं कालिका पातु कण्ठं पातु नभोगतम् ॥ ५॥ var उग्रतारा नभोगतम्

नारायणी गुह्यदेशं मेढ्रं मेढ्रेश्वरी तथा ।
पादयुग्मं जया पातु सुन्दरी चाङ्गुलीषु च ॥ ६॥

षद्पद्मवासिनी पातु सर्वपद्मं निरन्तरम् ।
इडा च पङ्गला पातु सुषुम्ना पातु सर्वदा ॥ ७॥

धनं धनेश्वरी पातु अन्नपूर्णा सदावतु ।
राज्यं राज्येश्वरी पातु नित्यं मां चण्डिकाऽवतु ॥ ८॥

जीवं मां पार्वती सम्पातु मातङ्गी पातु सर्वदा ।
छिन्ना धूमा च भीमा च भये पातु जले वने ॥ ९॥

कौमारी चैव वाराही नारसिंही यशो मम ।
पातु नित्यं भद्रकाली श्मशानालयवासिनी ॥ १०॥

उदरे सर्वदा पातु सर्वाणी सर्वमङ्गला ।
जगन्माता जयं पातु नित्यं कैलासवासिनी ॥ ११॥

शिवप्रिया सुतं पातु सुतां पर्वतनन्दिनी ।
त्रैलोक्यं पातु बगला भुवनं भुवनेश्वरी ॥ १२॥

सर्वाङ्गं पातु विजया पातु नित्यञ्च पार्वती । var सर्वाङ्गं सर्व निलया
चामुण्डा पातु मे रोमकूपं सर्वार्थसाधिनी ॥ १३॥

ब्रह्माण्डं मे महाविद्या पातु नित्यं मनोहरा ।
लिङ्गं लिङ्गेश्वरी पातु महापीठे महेश्वरी ॥ १४॥

सदाशिवप्रिया पातु नित्यं पातु सुरेश्वरी ।
गौरी मे सन्धिदेशञ्च पातु वै त्रिपुरेश्वरी ॥ १५॥

सुरेश्वरी सदा पातु श्मशाने च शवेऽवतु ।
कुम्भके रेचके चैव पूरके काममन्दिरे ॥ १६॥

कामाख्या कामनिलयं पातु दुर्गा महेश्वरी ।
डाकिनी काकिनी पातु नित्यं च शाकिनी तथा ॥ १७॥

हाकिनी लाकिनी पातु राकिनी पातु सर्वदा ।
ज्वालामुखी सदा पातु मुख्यमध्ये शिवाऽवतु ॥ १८॥

तारिणी विभवे पातु भवानी च भवेऽवतु ।
त्रैलोक्यमोहिनी पातु सर्वाङ्गं विजयाऽवतु ॥ १९॥

राजकुले महाद्युते सङ्ग्रामे शत्रुसङ्कटे ।
प्रचण्डा साधकं माञ्च पातु भैरवमोहिनी ॥ २०॥

श्रीराजमोहिनी पातु राजद्वारे विपत्तिषु ।
सम्पद्प्रदा भैरवी च पातु बाल बलं मम ॥ २१॥

नित्यं मां शम्भुवनिता पातु मां त्रिपुरान्तका ।

इत्येवं कथितं रहस्यं सर्वकालिकम् ॥ २२॥

भक्तिदं मुक्तिदं सौख्यं सर्व सम्पत्प्रदायकम् ।
यः पठेत् प्रातरुत्थाय साधकेन्द्रो भवेद्भुवि ॥ २३॥

कुजवारे चतुर्दश्याममायां मन्दवासरे ।
यः पठेत् मानवो भक्त्या स याति शिव मन्दिरम् ॥ २४॥

गुरौ गुरुं समभ्यर्च्य यः पठेत्साधकोत्तमः ।

स याति भवनं देव्याः सत्यं सत्यं न संशयः ॥ २५॥

एवं यदि वरारोहे पठेद्भक्ति परायणः ।
मन्त्रसिद्धिर्भवेत्तस्य चाचिरान्नात्र संशयः ॥ २६॥

सत्यं लक्षपुरश्चर्याफलं प्राप्य शिवां यजेत् ।
राजमार्गं शिवमार्गं प्राप्य जीवः शिवो भवेत् ॥ २७॥

पठित्वा कवचं स्तोत्रं मुक्तिमाप्नोति निश्चितम् ।
पठित्वा कवचं स्तोत्रं दशविद्यां यजेद्यदि ।
विद्यासिद्धिर्मन्त्रसिद्धिर्भवत्येव न संशयः ॥ २८॥

तदैव ताम्बुलैः सिद्धिर्जायते नात्र संशयः ।
अशवसिद्धिश्चितासिद्धिर्दुर्लभा धरणीतले ॥ २९॥

अयत्नसुभगा सिद्धिस्ताम्बूलान्नात्र संशयः ।
निशामुखे निशायाञ्च महाकाले निशान्तके ।
पठेद्भक्त्या महेशानि गाणपत्यं लभेत् सः ॥ ३०॥

इति श्रीमुण्डमालातन्त्रे दशमपटले पार्वतीश्वरसंवादे मन्त्रसिद्धिस्तोत्रं कवचं अथवा महाविद्याकवचं सम्पूर्णम् ॥

मुण्डमालातन्त्रे दशमः पटलः श्लोकाः ५७-८६

Proofread by Aruna Narayanan narayanan.aruna at gmail.com, NA

---

*Mahavidya Kavacham 2*

pdf was typeset on August 7, 2020

Please send corrections to *sanskrit@cheerful.com*